

अमर
चित्र
कथा
संख्या २०२
संस्कृत
कालिदासः
Pratap Mulick

संस्कृतस्य महान् कविः कालिदासः। अस्य विषये यत्किमपि ज्ञानं लभ्यते तत्तु अस्य रचनामाध्यमेन एव। अनेन एव ज्ञायते यदयं ब्राह्मणकुलजः आसीत्। अयं च शिवभक्तः अपि। एतस्मात् व्यतिरिक्तं अस्य व्यक्तिगतजीवन विषये किमपि अन्यत् साधनं नोपलभ्यते। अस्य मातुः पितुः च नाम अपि न प्राप्नोति, न च जन्मस्थानस्य अपि। अस्य ज्ञानस्य अभावेन कालिदास विषये कत्यपि दन्तकथाः श्रुतिपथम् आयान्ति। एतासु काश्चित् अद्यापि प्रचलिताः वर्तन्ते। प्रस्तुता रचना अपि एतादृश्याः कथायाः आधारेण एव जाता अस्ति।

कालिदासेन संस्कृतभाषायां रघुवंशं, कुमारसंभवं चेति महाकाव्ये • मेघदूतं, ऋतुसंहारं चेति खण्डकाव्ये, मालविकाग्निमित्रम्, अभिज्ञानशाकुन्तलं, विक्रमोर्वशीयं चेति नाटकानि व्यरचितानि। एताभिः रचनाभिः एव अनेन ख्यातिः समधिगता। एषा अस्य ख्यातिः सर्वतः उचिता एव। एताभिः रचनाभिः ज्ञायते यत् अयं कविः महान् निसर्गप्रेमी आसीत्। कालिदासस्य महाकाव्यनाटकादिषु यद् वर्णनं वर्तते तेन ज्ञायते यद् अनेन बहुविधप्रदेशेषु सञ्चारं कृत्वा तत् सर्वं दृष्टम् आसीत्। अस्य काव्येषु पर्वतीय जलधारावत् अखण्डप्रवाहः, सौन्दर्यं च वर्तते। अनेन नारीवर्णनम् अपि अति कोमलभावेन कृतम् अस्ति। अस्य रचनासु उज्जयिनी-विषये अस्य महती आत्मीयता प्रतीयते। एषा नगरी अस्य परिचिता इति दृश्यते।

विद्वज्जनानां मतम् एवं विद्यते यत् विदूत्तायाः प्रभावः अस्य सर्वकृतिषु विलसति। तत्रापि अभिज्ञानशाकुन्तलम् इति सर्वश्रेष्ठा रचना अस्ति। कालिदासः शेक्स्पीयर, गेटे चेति एताभ्यां समानस्तरीयः इत्यपि केचित् मन्यन्ते। संस्कृतसाहित्यसंसारे तु अयम् अमरः एव वर्तते।

संस्कृतानुवादकः - पं. गुलामदस्तगीरः अब्बासअलिः बिराजदारः।
प्रेरकः - विश्वसंस्कृत प्रतिष्ठानं, रामनगरं • दुर्गः, वाराणसी- २२१००८

Editor : Anant Pai

Script : Yagya Sharma ● Artworks : Dilip Kadam

Published by H. G. Mirchandani, for India Book House Pvt. Ltd, Eruchshaw Bldg, 249, Dr Dadabhai Naoroji Road, Bombay 400 001; and printed by him at Prasad Offset Press, Shed B & C, S. No. 42, Hissa No. 2, Sativali, Vasai Kaman Road, Vasai Taluka, Thane District.




संयोगवशात् तस्मिन् काले वाराणसीनरेशस्य कन्या महती रूपवती गुणवती चासीत्।
मम महती चिन्ता एषा एव– "वासन्त्याः कृते अनुरूपः गुणी च वरः कुतः प्राप्येत मया?"
वररुचिः अस्ति! सः सर्वतः उपयुक्तः।
वररुचिः? सः विद्वान् अपि। वासन्ती तु सहजतया सिद्धा भवेदित्यपि शङ्का। ततः...
सा तथा प्रष्टव्या भवतु। तदा तस्याः मनसि किमस्ति इति ज्ञायते।
वासन्ती स्वज्ञानविषये महाभिमानिनी।
भवतां दृष्ट्या कः पुरुषः अस्ति यः मां शास्त्रार्थे पराजयते? एतादृशः पुरुषः द्रष्टव्यः, सः एव मम पाणिग्रहणे अधिकारी भवितुमर्हति।
वररुचिणा आह्वानं स्वीकृतम्। तदा वासन्ती मनसा आशङ्कते। यतः वासन्ती तां नेच्छति स्म। तेन सह विवाहार्थं तस्याः इच्छा नासीत्।
सः विद्वान्। कदाचित् सः मां जयेत। मां जेतुं सः न पारयेदिति प्रयते।


तेन सह किमपि विशेषं कार्यम्।
शास्त्रार्थदिने–
शास्त्रार्थः मूकः भवेत्। अहं सङ्केतद्वारा प्रश्नं करिष्ये, भवान् सङ्केतेनैव उत्तरयतु।
ततः वासन्ती एकाम् अङ्गुलिं दर्शयति।
भगवान् एव जानाति कः अस्ति एषः प्रश्नः!
वररुचिणा पराभवः स्वीकृतः। तदा वासन्ती अत्यानन्दिता।
अहं प्रश्नोत्तरं दातुम् असमर्थः।
नमस्कारः महापण्डित, गच्छतु भवान्।


वररुचिः महाखिन्नतां गतः।
एतादृशः अपमानः? राजकन्या अस्ति। प्रत्यपकारः कथं शक्यः?
तदा तेन एकाविचित्रा घटना दृष्टा।
रे रे बन्धो! त्वं शाखां मा तोड। अधः पतिष्यति।
अनेन तव किम्?
सः मन्दधीः कालिदासः यस्यां शाखायाम् उपविष्टः तामेव शाखां तोडति स्म।
अयं महामूर्खः अस्यकृते उपदेशः व्यर्थः।
वररुचिः स्वमार्गेण निर्गतः। स किञ्चित् दूरं गतः तदा कालिदासः शाखया सह पतितः।
आ...ह...


शृणु महाराज... तिष्ठ...
... त्वामेकं प्रष्टुम् इच्छामि।
कालिदासः धावन् वररुचिसमीपं प्राप्तः।
भवता कथितमासीत् यदहं पतिष्यामि इति। तत् कथं ज्ञातम्?
अत्र ज्ञानस्य का वार्ता? यः यत् पश्यति तदेव सः दर्शयति अग्रे किं भविष्यतीति।
परन्तु मया न ज्ञातम्। त्वं कः? अपि ज्योतिषी असि?
अहं ज्योतिषी नास्मि।
कथं नासि? त्वं तु पूर्वमेवादर्शयः- अहं शाखया सह पतिष्यामि।


कथनं मन्ये... परमहं ज्योतिषी नास्मि।
मयि दयां कुरु... दर्शय मम भाग्ये किं लिखितम्?
तव भाग्यम्? राजकन्यया सह तव विवाहः भविष्यति।
... राजकन्या? राजकन्या वासन्ती मे मनसि भ्रमति। अस्य मूर्खस्य आधारेण तस्याः प्रत्यपकारः कर्तव्यः।
त्वया कथितं - राजकन्यया सह? अत्र तु कापि राजकन्या नास्ति।
यथाहं वदामि तथा कुरु। कथनं मे सफलमेव भवेत्।


वररुचिणा कालिदासं स्वगृहं नीतः। सः च विदुषां वेषयुक्तः साधितः।
अधुना त्वं पण्डितसदृशः भासि। राजभवने स्थानं प्राप्नोषि। पुष्पकरण्डकमेनं गृहाण।
वररुचिः कालिदासः च राजभवनं गतौ।
सावधानेन तिष्ठ... राजानं दृष्ट्वा तस्योपरि पुष्पवर्षा कुरु। ॐ स्वस्तिः इति उक्त्वा आशीर्वादं यच्छ।
त्वं यत्कथयसि तथैव करिष्ये।
राजभवने -
सः राजा अस्ति।
साधु... प्रथमं तस्योपरि पुष्पवर्षा करोमि ततः वदामि।
... वदानि... किं वदानि? उस-स्वट्री? उ-शट्र? ... स्मृतम...


...उष्ट्र!
अयं किम् ? उष्ट्रः इति मां वदति।
वररुचिणा बुद्ध्या कार्यं साधितं स्थितिः च व्यवस्थापिता -
न हि महाराज... अनेन भवते विशिष्टः आशीर्वादः दत्तः।
वररुचिणा त्वरितमेका छन्दोरचना कृता सा च श्राविता।
उमया सहित-स्तातः,षडानन-गणेशयोः,टङ्कारकृत्पिनाकोऽसौ रक्षतु त्वां सदा शिवः॥
एतासां पङ्क्तीनामाद्याक्षर संयोगेन अनेन आशीर्वचनं रचितम्। एतादृशविदुषः दर्शनेन अहं धन्यः जातः अस्मि।


महाराज, अयं पण्डितः कालिदासः। अयं राजकन्या-वासन्त्या सह शास्त्रार्थार्थम् आयातः।
हर्षस्य विषयः... केनापि साहसं नु कृतम् !
अयं राजकन्यया सह शास्त्रार्थं करोति... परमयमपि न वदति राजकन्यावत् मौनेन भवति।
इदं तु योग्यमेव। शास्त्रार्थाय तिथिः निश्चिता करणीया।
निश्चिततिथौ -
सावधानेन कालिदास! पुनः उष्ट्रसदृशं किमपि वदसि तदा सर्वनाशः एव।
न हि वदामि।


हस्ताभ्यां यथेच्छं कुरु- मुखं तु मा उद्घाटय, नोचेत् राजकन्यया सह विवाहसमयः निश्चिछेत्।
मौनेन शास्त्रार्थः आरब्धः। पूर्ववदेव वासन्त्या एकाङ्गुलिः दर्शिता।
पुरुषः तु अत्याकर्षकः! किन्तु मम प्रश्नमपि जानाति किम्? एकमेव सत्यं, सत्यमेव परमेशः?
किन्तु कालिदासः अस्याशयमन्यदेवामन्यत –
साधु, अपि त्वं मम एकं नेत्रं भेत्तुम् इच्छसि?
अहं तव द्वे नेत्रे भिनद्मि।


प्रश्नः ज्ञातः अनेन उत्तरमपि यथार्थं दत्तम्।
अस्य मतमस्ति यत् परमेशादतिरिक्तः व्यक्तिगतः आत्मा अपि सत्यम्, शश्वच्च। एवमेव एतौ द्वौ स्तः, नैकः।
द्वितीयप्रश्नरूपेण वासन्त्या पञ्चांगुलयः प्रदर्शिताः।
शरीरं पञ्चतत्त्वैः सञ्जातं.. अग्निः, वायुः, आकाशं जलं, भूमिः चेति।
मां चपेटया प्रहर्तुमिच्छसि?
...चपेटया प्रहरसि? अहं मुष्टया प्रहरामि।


कथं यथार्थमुत्तरं दत्तम् ? तत्त्वानि पञ्च, तथापि मानव शरीरे तेषाम् एकत्वमेव भवति।
राजकन्या पराभवं स्वीकरोति कालिदासेन सह तस्याः विवाहः भवति।
मम विद्वत्ता तु तथैव स्थिता अनेन मूर्खेण च सा जिता। राजकन्या तु स्त्रीः एव.. मूढा.. अस्य सुन्दरतया प्रसन्ना जाता।
विवाहान्ते कालिदासेन राजकन्या स्वपर्णकुटीं नीता।
मम पतिः अत्यपरिग्राही ज्ञायते। तथापि अस्य विद्वत्ताधारेण मम जीवनं सुखी भवेत्।
तदा नातिदूरे उष्ट्रस्य ध्वनिः तया श्रुतः।
बुड बुड...
बुड-बुड...


वासन्ती अस्मरत् - कालिदासः तस्याः पितरम् उष्ट्रः इति अवदत्।
अयं कः पशुः अस्ति?
हः -उद्र..
उद्र! अर्थात् उष्ट्रः ?
हं... हं... उष्.. उष्.. द्र
संस्कृतस्य साधारण- शब्दः तथापि उच्चारणे कथमवरोधः ?
सं.. सं.. संस्कृतम् मया नैव पठितं कदापि!
वासन्त्याः हृदये आघातः जातः।
अपि त्वं विद्वान् नासि ?
नहि, गोपः अस्मि।



गोरक्षक:?
मा कुध्यस्व! अहं नित्यं त्वां प्रसन्नां स्थापयितुं प्रयते। प्रातरेव धारोष्णं दुग्धमानीय पाययामि।
वररुचिणा मम छलं कृतम्। परन्तु मया मूर्खपति: न स्वीक्रियते।
गच्छ इत:। मम पति: महान् विद्वान् एव भवितुमर्हति। त्वं तु केवलं ग्राम्य: एव!
स: तत: झटित्येव निर्गत: वासन्ती च पश्चात्तप्ता जाता।
किमर्थमेवं कठोराऽभवम्? अहं किं जाने यदयं सत्यमेव इत: यास्यति?


वासन्त्या: कथनं कालिदासोपरि महान् प्रहार: एव।
अहं विद्वान् भवामि! परं कथम्?
कालिमातु: मन्दिरम्। त्वां प्रार्थये-मह्यं विद्यां देहीति।
कालिदास: कालिमूर्ते: पुरत: ध्यानमग्न: उपाविशच्च।
कतिपयदिनपर्यन्तं किमपि न भुक्तं न पीतं च तेन।




* अपि तव वाणी सम्यक् जाता?





कालिदासेन स्वजीवनं संभ्रमणे एव यापितम्। संस्कृतभाषा तस्य प्रभावपूर्णा आसीदेव। अतः सृष्टिसौन्दर्येण प्रेरितेन तेन संस्कृते कविताः रच्यन्ते स्म।
सर्वत्र स्वसमृद्धिं वितन्वन् ऋतुराजः तडागजलं यथा दोलयति तथैव च कमल-मुकुलानि अस्पृष्ट्वा एव विकसनाय अनुनयति।
मेघाः अन्योन्यं संघर्षन्ति, दुन्दुभिध्वनिवद् गर्जन्ति च। सौदामनी यस्य प्रत्यञ्चा इति सप्तवर्णीय-इन्द्रधनुः आकाशे स्पष्टं विलसति।
कालिदासः सञ्चरन् राजसभायामपि उपतिष्ठति स्म। धाराराज भोजस्य विद्वन्मण्डले सः अतिप्रियः आसीत्। भोजः साहित्यकलानां प्रशंसकः आसीत्। एकदिने-
अपि कश्चित् एतादृशीं कवितां रचयति यस्याः अन्तिमचरणः -टटम्, टटम्, टम्, टटटम्, टटम्, टः?
राजसभास्थाः सर्वे विद्वांसः विङ्मूढाः जाताः।
निरर्थकशब्दैः का अपि कविता शक्या?
परन्तु शीघ्रकविकालिदासः तथा प्रतिभावान्।
महाराज्ञी भोजराजदर्शनार्थी सोपानैः अवतरति स्म...



... चन्दनलेपपूर्णं सुवर्णपात्रं तस्याः हस्तात् निःसृतम्...
...ततः एषः ध्वनिः। टटम्, टटम्, टम्, टटटम्, टटम्, टः!
कालिदास, तव कल्पना धन्या।
कालिदासस्य इच्छा जाता यत् राजसभा-विषये नाटकं रचनीयमिति।
कस्यापि राज्ञः प्रेम कस्याः अपि सुन्दर-युवत्याः उपरि इति विषयः।
प्रश्नः अयमेव... नवलेखकस्य रचनायाः स्वागत-मपि भवेत् वा न वा?
"मालविकाग्निमित्रम्" कालिदासस्य प्रथमं नाटकम्। तस्य प्रस्तावनायां तेन इच्छा व्यक्तीकृता यत् नाटककाररूपेण ख्यातिः भवतु।
बुद्धिमान् मनुष्यः रचनायाः अध्ययनं कृत्वा तद्विषये स्वमतं धारयति, अन्येषां मतं केवलं मूर्खाः स्वीकुर्वन्ति।


नाटकं बहु लोकप्रियमभवत्। तस्य द्वितीयं नाटकं "शाकुन्तलम्" तु ततः आपि आधिकं सफलम् अभवत्। धर्मप्राणराजः स्नेहमयीं स्वपत्नीं परित्यजति इत्ययं प्रसङ्गः प्रेक्षकान् विलापयति।
नारीजीवनस्य कृते शुभाशुभविषये अधिकारः तस्याः पत्युः एव भवति।
गौतमि, चलतु।
राजा मम त्यागः तु कृतः एव। अपि यूयं नु मां त्यक्त्वा गच्छथ?
ओः - शकुन्तले!
कालिदासेन "कुमारसंभवम्," "मेघदूतम्," "रघुवंशम्", "ऋतुसंहारम्" चेति काव्यानि रचितानि। अनेन तस्य ख्यातिपटले चत्वारः चन्द्राः एव संलग्नाः।


राजा भोजः कालिदासस्य मित्रतां बहु मन्यते स्म। तथापि एकस्मिन् विषये विवादः अभवत्।
कालिदास, त्वं स्वनृपविषये प्रशंसापरां कवितां लिखितुं किं न मन्यसे?
भवान् निस्संदेहं महान् राजा। परन्तु विनाशिप्राणिप्रशंसा कवितायाः लक्ष्यं नास्ति।
त्वं मम राजसभायां भवसि। तथापि अन्यकविसदृशं मम गुणगानं न करोषि! अपि एषः आश्चर्यविषयः नास्ति वा?
सत्यम् एवास्ति।
भोजराजस्य व्यवहारेणानेन व्यथितः कालिदासः ग्रामान्तरे वसति स्म।
बहुदिनानि गतानि। ततः राजा चिन्तातुरः।
मयैव मित्रस्य अन्वेषणं कर्तव्यम्।
दूरातिदूरं कालिदासमन्वेष्टुं पुरुषाः प्रेषिताः। परन्तु सः न प्राप्तः। तथापि भोजराजेन प्रयासाः न त्यक्ताः। ततः ...
कालिदासान्वेषणे एकः उपायः अस्ति।


अग्रिमदिने राजसभायाम्...
यः कः अपि मां नवां कवितां श्रावयति तस्मै एकलक्षस्वर्णमुद्राः ददामि। कविता नूतना एव भवतु।
ततः राज्ञा पण्डितसभा आहूता।
यावत् कालिदासः नागच्छेत् तावत् नैषा नवा कविता इति वदन्तु।
बहुभिः कविभिः समागत्य कविताः श्राविताः –
एषा कविता नवा नास्ति।
मयैषा पूर्वमपि श्रुता।
...मयापि।
एषा वार्ता कालिदासस्यापि कर्णपथमायाता। सः राज्ञः मनसः हेतुं जानाति। कवयः निराशतां गत्वा प्रतिनिवृत्ताः इत्यस्य दुःखमपि।
राजा नवां कवितां श्रोतुमिच्छति तथा नवा कविता श्राव्यते।


ततः तेन मार्गं क्रमन् पुरुषः आहूतः।
एषा कविता भोजराजं श्रावणीया। एषा मयैव रचिता इति वदतु। ततः सः तुभ्यं बहुपुरस्कारान् दास्यति।
परन्तु विद्वन्, अहं कविः नास्मि।
अपि त्वं धनमिच्छसि नु? मम कथनं मन्यस्व त्वं धनं लभसे। कापि बाधा नहि।
तेन पुरुषेण सा कविता राजसभायां श्राविता –
एकनवतिकोटि-स्वर्णमुद्राः तव पित्रा अस्मत्तः ऋणरूपेण गृहीताः। भोजराज, किमद्यापि तं धनराशिं मह्यं प्रत्यर्पणस्य समयः नागतः वा?
पण्डिताः कवितां श्रुत्वा सन्नाः अभवन्।
अपि मम कविता भवद्भिः पूर्वमपि श्रुता स्यान्नु?


हामिति वदन्ति, ततः राज्ञ ९१ कोटिस्वर्णमुद्राः देयाः भवन्ति।
नहि चेति वदन्ति ततः?
...सा कविता नवा मन्यते।
तव पण्डितैः एषा कविता पूर्वं न श्रुता स्यात् तथैषा नूतना मन्तव्या। मह्यं च एकलक्षस्वर्णमुद्राः दातव्याः।
राजा भोजः अस्य ग्राम्यस्य चातुर्येण प्रसन्नः अभवत्।
कविता तव नूतना। गृह्यतामयं पुरस्कारः।
युगे-युगे जीव, भोजराज!
अधुना त्वया वक्तव्यम् अप्येषा कविता त्वयैव रचिता?
ज..जी... हं, महाराज!


इदं धनं तवैव... त्वं सत्यं वद... असत्यं वदेः, तदा दण्डयामि।
मया नहि, ग्रामे एकः विद्वान्। तेन रचिता।
कालिदासः एव सः विद्वान्। कः तव ग्रामः? अहं तं विद्वत्तमं सम्मिलामि।
तौ तं ग्रामं गतौ-
अस्यां पर्णकुट्यां स वसति।
कालिदास, मया ज्ञात तत्, यत् तस्मै ग्राम्याय स्वकवितां दत्त्वा त्वां विना तं प्रेषितुं कः अपि अन्यः न समर्थः इति। त्वं मम अनुचितां वार्तां विस्मर, कविराज, राजसभायां चल।
यथा भवतः इच्छा, राजन्!


अनेन मेल-संमेलनेनापि तयोः मतभेदः जातः। यदा का अपि वार्ता जाता तथा, तदा कालिदासः अन्यत्र गच्छति स्म, बहुमनोनीतान्ते एव प्रत्यागच्छति स्म। एकदा एवमभवत्-सः प्रत्यागमने सिद्धः नैव जातः।
महाराज, कालिदासः प्रायः ५० मीलस् दूरे ग्रामे अस्ति। मया सः बहुमनोनीतः। तथापि तेन किमपि न श्रुतम्।
अहमेव गत्वा तमानयामि
भोजराजः ज्ञातुकामः यत् कालिदासस्य तस्य विषये कः विचारः अस्तीति।
वेषान्तरं कृत्वा तस्य समीपे गच्छामि।
प्रणामाः, अहं धारातः आगतः।
आयातु, राजा भोजः कथमस्ति?
तस्य तु अद्यु-नैव देहान्तः अभवत्।
हे राम!


कालिदासः एवं दुःखमग्नः, तच्च दुखं कवितारूपेण निस्सृतम्।
अद्य धारा निराधारा निरालंबा सरस्वती, पण्डिताः खण्डिताः सर्वे भोजराजे दिवं गते॥
अन्ततः अद्य त्वया काव्ये मम गुणाः गीताः। कालिदास, अहम् अजानं, यत् त्वत्तः एतादृशीं रचनां कारयितु-महं न पारये.
कालिदासेन राजा ज्ञातः तदा तस्मिन्नेव काव्ये परिवर्तनम् –
अद्य धारा सदाधारा सदालंबा सरस्वती पण्डिताः मण्डिताः सर्वे भोजराजे इहागते॥
कतिपयकालेन पुनरपि द्वयोः विवादः ततः च कालिदासः श्रीलङ्कां गतः।


श्रीलङ्कानरेशः कुमारदासः कालिदासं बहु मन्यते स्म। तथापि कालिदासेन तस्याश्रयः न संमतः।
ममात्रागमन-ज्ञानान्ते कुमारदासः भोजराजं सूचयिष्यति।
अधुना मम इच्छा धारां गमनस्य नास्ति।
अतः कालिदासः कस्याः अपि नर्तक्याः गृहे वसति।
भोजराजवदेव कुमारदासः अपि साहित्यकलानां महा प्रेमी आसीत्।
गृह्यतामयमेकसहस्र-स्वर्णमुद्रापुरस्कारः सुन्दररचनार्थम्।
यः कः अपि एनां छन्दोरचनां पूरयति तस्मै महाराजः एकलक्षस्वर्णमुद्राः दास्यति।


परन्तु केनापि तत् छन्दः पूर्णतां न नीतम्। कतिपयदिनानि गतानि –
... महाराजेन महत् कठिनं कार्यं दत्तम्।
अहं प्रयतै?
किं छन्दः अस्ति?
कमलेन कमलं प्रस्फुटितं भवतीति वार्ता मया श्रुता परमिदं केनापि न दृष्टम्।
दृष्टं मया –
भवता कुत्र?
अत्रैव। अधुनापि दृश्यते मया। तव मुख-कमले कमलनयने।



बहुसुन्दरमस्ति। इदं लिख्यताम्।
इदं छन्दः महाराजेन अवश्यं पुरस्क्रियते। परं कालिदासेन गृह्यते। तेन नैव गृह्यते इति करोमि। मम हस्तगतान्ते मया आभूषणादि गृह्यते।
सा सपद्येव कालिदासं क्षुरिकया प्रहरति।
आह! वासन्ति, तव शापः सत्यतां गतः।



नर्तकी छन्दः कुमारदासं श्रावयति।
सुन्दरम्! महान् अस्ति अस्य रचनाकारः!
भवतः अनुग्रहः अस्ति।
शैली तु मम परिचितेति भाति। एषा तु कालिदासस्य रचनावदेव अस्ति।
भयभीतां नर्तकीं दृष्ट्वा कुमारदासस्य सन्देहः पुनरप्यवर्धत।
अप्येषा रचना याथार्थ्येन तवास्ति?
हे राजन्!
त्वया कस्यापि विना सहायेन एताः पङ्क्तयः रचिताः?
हम्...


त्वम् असत्यं वदसि। सत्यं वद अन्यथा कालकोष्ठे त्वां बद्धां करोमि।
क्षम्यताम्..
मम लालसा मामन्धत्वं नीतवती। रचनाकारस्य मया हत्या कृता!
दयाहीने, नारि, त्वया कालिदासः हतः।
कुमारदासः त्वरितं नर्तक्याः गृहं गतः।
हे भगवन्, अल्पधनलोभेन अनया नर्तक्या महाव्यक्तेः प्राणाः गृहीताः।
कुमारदासेन कालिदासस्य दाहसंस्कारः कारितः। अग्निना कवेः पार्थिव-शरीरं परिदहति।
ततः राजा अपि एतादृशः शोकविह्वलः जातः यत् स्वयमपि सः तस्यां चितायां उत्पतति तदा तस्यापि शरीरं भवति भस्मीभूतम्।